युक्तिदीपिकाकारविद्वद्रत्न—

श्रीयुक्तिधरविरचितम्

आत्मगुणाष्टकम्

रामं ब्रह्म नमस्कृत्य श्रुतानन्दं गुरुं तथा ।
आत्मगुणाष्टकं वक्ष्मि वैष्णवानामपेक्षितम् ॥१॥
कश्चिद् धर्मो न यत्तुल्यो वैष्णवत्वप्रयोजकः ।
सर्वभूतहितेच्छा सा दयाख्यश्चात्मनो गुणः ॥२॥
शक्तस्य कळेशितस्यापि वैष्णवत्वप्रयोजकः ।
क्रोधाभावो बुधः प्रोक्तः क्षमाख्यश्चात्मनो गुणः ॥३॥
गुणेष्वदोषदर्शित्वं वैष्णवत्वप्रयोजकम् ।
अनसूयाऽभिधस्तच्च भाषितश्चात्मनो गुणः ॥४॥
बाह्याभ्यन्तरसंशुद्धिर्वैष्णवत्वप्रयोजिका ।
कुसङ्गरहिता सा च शौचाख्यश्चात्मनो गुणः ॥५॥
सतामकष्टदं कर्म वैष्णवत्वप्रयोजकम् ।
अनायासाभिधस्तद्धि धर्म्य एवात्मनो गुणः ॥६॥
वर्जनमप्रशस्तानां वैष्णवत्वप्रयोजकम् ।
प्रशस्ताचरणं चाथ मङ्गलं चात्मनो गुणः ॥७॥
पात्रेऽदीनतया दानं वैष्णवत्वप्रयोजकम् ।
अदैन्याख्यो बुधैः प्रोक्तः प्रशस्यश्चात्मनो गुणः । ८॥
न्यायार्जितेन सन्तोषो वैष्णवत्वप्रयोजकः ।
स्पृहाभावो बुधैः प्रोक्त उत्तमश्चात्मनो गुणः ॥९॥
श्रीयुक्तिदीपिकाकारयुक्तिधरेण निर्मितम् ।
आत्मगुणाष्टकं भूयाद् वैष्णवानां सुखप्रदम् ॥१०॥

— * —